**2.4.5** संस्थायां कश्चन क्रियाविधिः वर्तते यस्मिन् युवाध्यापकाः वरिष्ठविदुषां सन्निधौ शास्त्राध्ययनाय प्रोत्साह्यन्ते। गुरूणां नामानि सूचयन्तु येभ्यः अध्यापकाः शास्त्राणां वेदशाखानां वा पारम्परिकम् अध्ययनमकुर्वन्।

***Institution has devised a mechanism to enable the young faculty to learn shastras under learned Gurus. Specify the names of Gurus from whom the teachers/ faculty members have studied Shastras/Veda Shakhas.***

---

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन तादृशी व्यवस्था प्रकल्पिता वर्त्तते यत्र अस्य विश्वविद्यालयस्य युवानोऽध्यापकाः वरिष्ठानाम् आचार्याणां सन्निधौ यथेप्सितं शास्त्रं पठितुं शक्नुवन्ति । अत्र युवानोऽध्यापकाः लब्धावसराः गुरुगेहं गत्वा अपि प्रौढान् परम्परागतग्रन्थान् गुरुसविधेऽधीयते। एवं हि परस्परं प्रेम्णा व्यवहरन्तः तौ उभावपि गुरुशिष्यौ स्वजीवनम् उन्नतिपथं नयतः।

अस्मिन् विश्वविद्यालये प्रत्येकं विभागः काले काले 'शास्त्रीयव्याख्यानमाला' इति प्रकल्पं सञ्चाल्य आविश्वं प्रसिद्धानां तत्तद्विषयेषु विचक्षणानां विदुषां व्याख्यानानि आयोजयति। तेषां विदुषां व्याख्यानस्य कार्यक्रमस्य रूपरेखां सङ्कायाध्यक्षः विभागाध्यक्षेण विभागस्थैः आयार्यैश्च सार्धं सम्मिल्य सज्जीकरोति। तेषां विदुषां व्याख्यानस्य अयं लाभो भवति यत् विभागेषु ये युवानोऽध्यापकाः शोधच्छात्राश्च भवन्ति तेभ्यः बहु किमपि शिक्षणाय लभ्यते। तेषां समागतानां विदुषां पुरस्तात् ते स्वकीयान् प्रश्नान् अपि निश्चिते प्रश्नोत्तरकाले प्रष्टुम् अर्हन्ति तान् च समाधातुं शक्नुवन्ति।

विश्वविद्यालयः यथानिर्धारितं शास्त्रार्थसभायाः आयोजनम् अपि करोति। तत्र शास्त्रार्थसभायां वरिष्ठानां गुरूणां सान्निध्ये युवभ्योऽध्यापकेभ्योऽपि बहूनि दायित्वानि दीयन्ते येन ते बहुविधमनुभवज्ञानं प्राप्नुवन्ति। अस्यां शास्त्रार्थसभायां युवानोऽध्यापकाः संयोजकरूपेणापि स्वीयं दायित्वं निर्वहन्ति। अनया परम्परया शिक्षकाः शनैः शनैः तस्मिन् क्षेत्रे निपुणाः भवन्ति।

इत्थमेव यूनः शिक्षकान् प्रशिक्षितुम् यथावसरं विश्वविद्यालयोऽयं कार्यशालानाम् अपि आयोजनं करोति। तत्रापि कार्यशालायां प्रथितयशसां विदुषां विशिष्टानि व्याख्यानानि आयोज्यन्ते। अत्रापि शास्त्रार्थसभामिव वरिष्ठानाम् आचार्याणां सन्निधौ कनिष्ठेभ्य आचार्येभ्यः संयोजकादीनां दायित्वं प्रदाय तेषां प्रशिक्षणं क्रियते।

अस्मिन् विश्वविद्यालये सद्यस्क (ऑनलाइन) माध्यमेनापि माननीयानां विदुषां विशिष्टानि व्याख्यानानि आयोज्यन्ते। एतस्य विशिष्टस्य व्याख्यानस्य कार्यक्रमः साप्ताहिको भवति। एतस्य कार्यक्रमस्य अध्यक्षाः विश्वविद्यालयस्यैव कुलपतयो भवन्ति। अयं कार्यक्रमः Google meet, Zoom इत्यादिभिः सद्यस्कउपकरणमाध्यमैः प्रतिसप्ताहम् आयोज्यते।

अस्मिन् विश्वविद्यालये न केवलम् इयमेव परिपाटी वर्त्तते यत् वरिष्ठेभ्य आचार्येभ्यो युवानोऽध्यापकाः अधीयते किन्तु युवभ्योऽध्यापकेभ्यः शोधच्छात्राः अपि समागत्य तं तं विषयं विषयातिरिक्तान् अपि च ग्रन्थान् पठन्ति। युवभ्योऽध्यापकेभ्यः पठिताः सामग्रीः शोधच्छात्राः स्वीये शोधप्रबन्धेऽपि समाकलयन्ति येन तत्रापि गुणाधानं भवति। विश्वविद्यालये इयं प्रक्रिया न केवलं कस्मिंश्चिद् विभागविशेषे भवति अपि तु अस्य विश्वविद्यालयस्य येऽपि सङ्कायाः वर्त्तन्ते पुनस्तेषु सङ्कायेषु येऽपि विभिन्नाः व्याकरणादयो विभागाः सन्ति तत्र सर्वत्र विधीयते।

अस्मिन् विश्वविद्यालये यथा वरिष्ठा आचार्याः यूनोऽध्यापकान् अध्यापयन्ति, युवानोऽध्यापकाः शोधच्छात्रान् पाठयन्ति तथैव शोधच्छात्रा अपि अस्य विश्वविद्यालयस्य कनिष्ठान् छात्रान् अध्यापयन्ति। तेन शोधच्छात्राणापि लाभो भवतीति। एवं प्रवर्तितं चक्रमिदं परस्परं सर्वेषां लाभप्रदं भवति। साम्प्रतं वरिष्ठेभ्य आचार्येभ्य ये युवान आचार्या अधीयते अधीतवन्तो वा तेषां केषाञ्चित् नामधेयं प्रस्तूयते –

| **क्रम संख्या** | **अध्यापकः** | **गुरोर्नाम** | **शास्त्रम्** |
|---|---|---|---|
| 1. | डॉ. दुर्गेश पाठकः | प्रो. राजाराम शुक्लः,<br>काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी, कुलपतिचरः -<br>सं.सं.वि.वि., वाराणसी | न्यायः |
| 2. | डॉ. कुप्पा बिल्वेशः | डॉ. आर. मणिद्राविडः, मद्रास् संस्क्रफ़ित कलाशाला,<br>मैलापूर, चेन्नै | अद्वैतवेदान्तः |
| 3. | डॉ. सत्येन्द्र कुमारः | प्रो. महेन्द्र पाण्डेयः,<br>सं.सं.वि.वि., वाराणसी | वेदः |
| 4. | डॉ. राजा पाठकः | प्रो. नागेन्द्र पाण्डेयः<br>सेवानिवृत्तः,<br>सं.सं.वि.वि., वाराणसी | ज्योतिषम् |
| 5. | डॉ. राजेश कुमार श्रीवास्तवः | प्रो. रमेश प्रसादः,<br>सं.सं.वि.वि., वाराणसी | पालि |
| 6. | डॉ. दिव्य चेतन ब्रह्मचारी | आचार्य पुरुषोत्तम त्रिपाठी<br>उदासीन सं. महाविद्यालय,<br>मीरघाट | व्याकरणम् |
| 7. | श्री नितिन आर्यः | डॉ. रविशङ्कर पाण्डेयः,<br>सं.सं.वि.वि., वाराणसी | व्याकरणम् |
| 8. | डॉ. मधुसूदन मिश्र | प्रो. रामजीवन मिश्रः<br>ज्योतिष विभाग, का.हि.वि.वि., वाराणसी | ज्योतिषम् |
| 9. | डॉ. कुञ्जबिहारी द्विवेदी | 1. प्रो. वशिष्ठ त्रिपाठी<br>सं.सं.वि.वि., वाराणसी<br>2. प्रो. राजाराम शुक्लः<br>का.हि.वि.वि., वाराणसी | न्याय |
| 10. | डॉ. ज्ञानेन्द्र सापकोटा | आचार्य पुरुषोत्तम त्रिपाठी<br>उदासीन संस्कृत महाविद्यालय<br>मीरघाट | व्याकरण |
| 11. | डॉ. बिजेन्द्र कुमार आर्य | आचार्य रामदेव शास्त्री जी<br>महर्षि दयानन्द उपदेशक महाविद्यालय<br>टंकारा, गुजरात | व्याकरण |
| 12. | डॉ. विजय कुमार शर्मा | प्रो. युगल किशोर मिश्रः<br>सं.सं.वि.वि., वाराणसी | वेद |

| | | | |
|---|---|---|---|
| 13. | डॉ. मधुसूदन तिवारी | प्रो. अमित कुमार शुक्लः<br>सं.सं.वि.वि., वाराणसी | ज्योतिषम् |

एवं संस्कृतविश्वविद्यालये एषा समीचीना ज्ञानविवर्धिनी परम्परा वर्त्तते यत्र युवानोऽध्यापकाः वरिष्ठेभ्य आचार्येभ्यः अधीयते।